५।२।१११—काण्डाण्डादीरन्नीरचौ ।
काण्ड+अण्ड, काण्ड+आण्ड (प्र० स०) ।

५।२।११२—रजःकृष्यासुतिपरिषदो वलच् ।
……पर्षदो[4]वलच् (पद०, गणरत्नमहोदधि, सि० कौ० दुर्घटवृत्ति, भागवृत्ति संकलन पृ० २८ टि०४) ।

५।३।५—एतदोऽन् ।
एतदोऽश् (का०, पद०, प्रदीप, सि० कौ०, उद्योत) ।

५।३।१८—दानीं च ।
इदानीं च (प्रदीप, उद्योत) ।

५।३।१९—तदो दा च ।
तदोऽदा च (प्रदीप) ।

---

१. रा० ला० क० ट्र० संस्करण में 'शुषि' पाठ छपा है ।
२. आजगव (=अजगव) आद्य धनुष था । द्र०—वायु पुराण २।५।५२; ४।४६ ।
३. अजकावं मैत्रावरुणम् । कात्यायन श्रौत ६।२।६ ।
४. तुलना करो—४।४।१०१ पाठ वा पाठान्तर के साथ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५।३।१०३—शाखादिभ्यो यत् ।
······यः (उद्योत ५।१।२१; प्र० स०, बाल०, शब्देन्दु० ६।३।४६) ।

५।३।११७—पर्श्वादियौधेयादिभ्योऽणञौ ।
पर्श्वादियौधेयादिभ्यामणञौ । (का०) ।

५।४।५०—कृभ्वस्तियोगे सम्पद्य कर्त्तरि च्वि ।
अभूततद्भावे कृभ्वस्तियोगे ·····(का०) ।

५।४।५४—तदधीनवचने ।
तदधीनवचने च (प्र० स०) ।

५।४।५७—अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् ।
· द्व्यजवराध्यार्दनि···(का० पाठा०) ।

५।४।६१—सपत्रनिष्पत्रादतिव्यथने ।
– तिव्यधने (बाल०) ।

५।४।१२०—सुप्रात···श्रेणीपदाजपदप्रोष्ठपदाः ।
· ···प्रोष्ठपदभद्रपदाः (अमरकोश १।३।२२ रामाश्रमी टीका, रायमुकुट टीका) ।
– श्रेणीपदाजपदाः (धातुवृ० ४।६४) ।
सुप्रात·· शारिकुक्ष—।
···सारिकुक्ष···(ना० पर्या०भा०पाठः) ।

५।४।१२१—नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ।
—·······हलिशक्त्यो·········(का० पाठा०, पद०, प्र० कौ० प्रसाद०, सि० कौ०, बाल०, तत्त्व० पाठा०) ।

षष्ठाध्याय

६।१।४७—स्फुरतिस्फुलत्योर्घञि ।
स्फुरिस्फुल्योर्घञि (क्षीरत० ६।९२) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

६।१।५१—विभाषा लीयतेः ।
लियो वा[1] (क्षीरत० १०।२०६) ।

६।१।१११—प्रकृत्याऽन्तःपादम् ।
[2]प्रकृत्याऽन्तःपादमव्यपरे (का०) ।
नान्तःपादम् (भाष्य) ।
नान्तःपादमव्यपरे (का० पाठा०, पद०, शब्दकौ० १।१।३; सि०कौ०, दीपिका) ।

६।१।११२—अव्यादवद्यादवक्रमुरव्रता .....।
.. ..दवचक्रमुरव्रता......(पद० सुबोधिनी) ।

६।१।११३—यजुष्युरः ।
यजुष्युरो (का० पाठा०) ।

६।१।११९—अवङ् स्फोटायनस्य ।
अवङ् स्फौटायनस्य (पद०, शब्देन्दु०) ।

६।१।१२०—इन्द्रे च ।
इन्द्रे च नित्यम् (का०) ।
इन्द्रे (ना०पर्या० भा०पाठ, अनन्त पर्या० भा० पाठ०) ।

६।१।१२१—प्लुतप्रगृह्या अचि नित्यम् ।
..... अचि (का०—'नित्यम्' नास्ति) ।

६।१।१२२—आङोऽनुनासिकश्छन्दसि ।
.........छन्दसि बहुलम् (भाष्य, का० पाठा०) ।

६।१।१३२—सम्परिभ्यां करोतौ भूषणे ।
सम्पर्युपेभ्यः करोतौ भूषणे (का०, क्षीरत० ८।११) ।

६।१।१३५—किरतौ लवने ।
किरतेर्लवने (क्षीरत० ६।१११) ।

---

१. व्याकरणान्तरसूत्रं स्यात् ।

२. रा० ला० क० ट्र० संस्करण में यही पाठ छपा है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

६।१।१४५ विष्किरः शकुनौ वा ।
विष्किरः **शकुनिर्विकरो** वा (का०) ।

६।१।२१३—मतोः पूर्वमात् संज्ञायामस्त्रियाम् ।
मतोः **पूर्व** आत्…… (स्वरसि०, सुबोधिनी) ।

६।२।४२—कुरुगार्हपत……तैतिलकद्रूःपण्य……।
……**कद्रूपण्य**…… (क्वचित्काशिकादिषु निर्विसर्गं इति प्रत्याख्यानसंग्रहः) ।

६।२।५२—अनिगन्तोऽञ्चतौ वप्रत्यये ।
…**ऽञ्चतावप्रत्यये** (ना० पर्या० भाष्य० पा०) ।

६।२।१०९—निष्ठोपसर्गपूर्वमन्यतरस्याम् ।
निष्ठोपसर्ग**पूर्वा**वन्यतरस्याम् (ना० पर्या० भा० पाठः) ।

६।२।१३३—चूर्णादीन्यप्राणिषष्ठ्याः ।
चूर्णादीन्यप्राण्युपग्रहात् (का० पाठा०) ।

६।३।३—ओजःसहोऽम्भस्तमसस्तृतीयायाः ।
…… **स्तपस**स्तृतीयायाः (भाषावृत्ति) ।

६।३।३९—स्वाङ्गाच्चेतः ।
स्वाङ्गाच्चेतो**ऽमानिनि** (का०) ।

६।३।५१—पादस्य पदाज्यातिगोप……।
पादस्य **पदाज्यति**गोप…… (क्षीरत० १।३३) ।

६।३।६४—इष्टकेषीकामालानां चिततूलभारिषु ।
……तूल**हारिषु** (धातुवृ० १।३२३) ।

६।३।७८—ग्रन्थान्ताधिके च ।
ग्रन्थान्ते**ऽधिके** च (अनन्त० पर्या० भा० पाठः) ।

६।३।८२—प्रकृत्याशिषि ।
प्रकृत्या**शिष्यगोवत्सहलेषु** (का०) ।

६।३।९१—विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ।
विश्वग्देवयोश्च **टेरद्रिः** (उद्योत ६।३।९५) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

६।३।९२—समः समि ।
समः सम्यन्तावप्रत्यये (उद्योत ६।३।९५) ।

६।३।१०३—का पथ्यक्षयोः ।
का पथ्यक्षयोश्च (वामनीय० पृ०१०, पं० ४) ।

६।३।११५—नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।
… रुजि … (क्षीरत० ६।१२१) ।

६।४।२५—दशसञ्जस्वञ्जां शपि ।
दन्शसन्जस्वन्जां शपि (क्षीरत० १।७०२) ।

६।४।४२—जनसनखनां सञ्झलोः ।
जनखनसनां सञ्झलोः (क्षीरत० ४।४०) ।

६।४।५६ ल्यपि लघुपूर्वात् ।
ल्यपि लघुपूर्वस्य (कैयट उभयथा पाठ, पद०) ।

६।४।९७—इस्मन्त्रन्क्विषु च ।
इस्मन्त्रन्क्विप्सु च (क्षीरत० १०।३६) ।

६।४।१०० घसिभसोर्हलि च ।
घसिभसोर्हलि (प्रदीप, पद०, अनन्त० पर्या० भा० पाठः) ।

६।४।१२६—न शसददवादिगुणानाम् ।
… … गुणिनाम् (क्षीरत० ११९७) ।
न शश… (प्र०कौ० भाग २ पृ०७५, तत्त्व०) ।

६।४।१३२—वाह ऊठ् ।
वाह ऊट् (ना० पर्या० भा०पाठः) ।

सप्तमाध्याय

७।१।२०—जश्शसोः शिः ।
जश्शिशसोः शिः (न्यास०) ।

७।१।३०—भ्यसो भ्यम् ।
भ्यसोऽभ्यम् (का० पाठा०) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

७।१।४३—यजध्वैनमिति च ।
यजध्यैनमिति च (का०) ।

७।१।६०—गोतो णित् ।
ओतो णित् (का०पाठा०, प्रसाद०, धातुवृ० १।७०२, पृ० २८१, व्याख्यासुधा १।१।६) ।

७।२।२—अतो ल्रान्तस्य ।
अतो र्लान्तस्य (उद्योत, शब्देन्दु०) ।

७।२।५—ह्म्यन्तक्षणश्वसजागृ ·····।
······'शसजागृ (क्षीरत० १।४८०) ।

७।२।११—श्र्युकः किति ।
श्र्युकः क्किति (का०पाठा०, भा० ३।२।१३९) ।

७।२।१९—धृषिशसी वैयात्ये ।
धृषशसी · (क्षीरत० १।४८०) ।

७।२।२१—प्रभौ परिवृढः ।
प्रभौ परिबृढः (क्षीरत० ६।५६, १।४८५) ।

७।२।२३—घुषिरविशब्दने ।
घुषेरविशब्दने (ना० पर्या० भा०पाठः) ।

७।२।३१—ह्रु ह्वरेश्छन्दसि ।
('ह्रु' इत्युकारविशिष्टोऽत्र पाठः केषाञ्चित्, 'ह्वृ' इति ऋकारवान् पाठोऽन्येषाम् । वृ० शब्देन्दु० भाग ३. पृ० २१९१) ।

७।२।३४—ग्रसित— क्षरितिक्षमितित्रमित्यमितीति च ।
······क्षरितिवमित्यमितीति च (सि०कौ०) ।

७।२।४०—सिचि च परस्मैपदेषु ।
सिचि परस्मैपदेषु (क्षीरत० १।६९४;५।१९) ।

---

१. क्षीरस्वामी 'शस्' पाठ मानकर 'श्वस् धातु के लुङ् में ७।२।७ सूत्र से वृद्धि का विकल्प कहता है । द्र०—क्षीरत० २।६६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

७।२।४८—तीषसहलुभरुषरिषः।
'तीषुसह······(क्षीरत०[2] ४।१२३, ६।२६, प्रदीप ७।२।४६, का० पाठ०)।

७।२।४९—सनीवन्तर्ध ज्ञपिसनाम्।
···ज्ञपिसनिततनिपतिदरिद्राणाम् (का० पाठा०)।

७।२।५७—सेऽसिचि कृतचृत······।
सेऽसिचि कृतिचृत···(क्षीरत० ७।६)।

७।२।६०—तासि च क्लृपः।
······कृपः (ना० पर्या० भा०पाठः)।

७।२।७३—यमरमनमातां सक् च।
···—सुक् च (क्षीरत० १।७०६,७११; २।४२)।

७।२।७४—स्मिपूङ्रञ्ज्वशां सनि।
स्मिङ्पूङ्रञ्ज्वशां सनि (क्षीरत० ७।२६)।

७।२।७८—ईडजनोर्ध्वे च।
ईडजोः स्ध्वे[3] च (का पाठा०, उद्योत)।

७।२।८०—अतो येयः।
अतो यासियः (का० पाठा०, प्रदीप)।
अतो या इयः (उद्योत १।४।१, ना० पर्या० भा० पाठः)।

७।२।१०३—किमः कः।
इमः कः (न्यास)।

७।३।१०—उत्तरपदस्य।
उत्तरपदस्य च[1] (ना० पर्या० भा०पाठ)।

---

१. द्र०—७।३।७७ सूत्र का पाठ वा पाठान्तर।

२. क्षीरत० १।४५८ के व्याख्यान में 'तीषसह' पाठ है। सम्भव है, वह अपपाठ हो।

३. तुलना करो—ईजजनोः सध्वे च। कातन्त्र ३।६।५॥

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

७।३।१७— परिमाणान्तस्याऽसंज्ञाशाणयोः ।
परिमाणान्तस्याऽसंज्ञाशाणकुलिजानाम् (का० पाठा०) ।

७।३।३१— यथातथयथापुरयोः पर्यायेण ।
यथातथायथा ····(सि०कौ०, उद्योत) ।

७।३।३९— लीलो···स्नेहविपातने ।
···· स्नेहविपाटने (क्षीरत० २।५१) ।

७।३।७५ ष्ठिवुक्लमुचमां शिति ।
ष्ठिवुक्लम्वाचमां शिति (का०, तत्त्व०, क्षीरत० १।३१५,३७३; ४।१००) ।
ष्ठिवुक्लम्याचमां शिति (ना० पर्या० भा० पाठः) ।

७।३।७७— [२]इषुगमियमां छः ।
[२]इषगमियमां छः (प्रदीप, शब्देन्दु० तिङन्ते, चन्द्रकला) ।

७।४।३— भ्राजभासभाषदीप ।
[३]भ्राजभासदीप · (क्षीरत० १।३४५) ।

७।४।४— लोपः पिबतेरीच्चाभ्यासस्य ।
···री चाभ्यासस्य (क्षीरत० १।६५७) ।

७।४।५५— आप्ज्ञप्यृधामीत् ।
आप्ज्ञप्ऋधामीत् । (क्षीरत[४]० ४।१७) ।

---

१. 'उत्तरपदस्य च' इति वृत्तौ । वृत्ति में चकार सम्प्रति नहीं मिलता है ।

२. द्रष्टव्य ७।२।४८ का पाठ वा पाठान्तर ।

३. यह पाठान्तर रामशंकर भट्टाचार्य ने उद्धृत किया है। परन्तु हमारा विचार है कि यहां लेखक-प्रमाद से 'भाष' धातु का पाठ भ्रष्ट हो गया है । अन्यत्र क्षीरत० १।१११, ३७५ आदि में सूत्रनिर्देश में 'भाष' धातु पठित है । 'भाष' धातु(१।४०५)में भी 'भ्राजभास'(दन्त्यसकारवान्)निर्देश करके णिजन्त में ह्रस्वविकल्प दर्शाया है ।

४. क्षीरत ५।१३५; ६।३८ में 'आपज्ञप्यधामीत्' पाठ ही मिलता है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

७।४।८४—नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ।
नीग्वन्चुस्रन्सुध्वन्सुभ्रन्शुकस··· (क्षीरत० १।५०१, ६०१; धातुवृ० ४।१२३) ।

७।४।८६—जपजभदहदशभञ्जपशां च ।
भन्ज (क्षीरत० ७।२१, तथा धातुनिर्देशात्) ।

७।४।९५—अत्स्मृदृत्वर ··।
अत्स्मृदृत्वर······ (सि०कौ० मोती० बना० सं० पृ० २८८) ।

अष्टमाध्याय

८।१।६७—पूजनात् पूजितमनुदात्तम् ।
···मनुदात्तं **काष्ठादिभ्यः** (का०) ।

८।१।७३—नाऽमन्त्रिते समानाधिकरणे ।
······करणे **सामान्यवचनम्** (का०) ।

८।१।७४—सामान्यवचनं विभाषितं विशेषवचने ।
विभाषितं विशेषवचने बहुवचनम् (का०) ।
विभाषितं विशेषवचने (स्वरसि०) ।

८।२।१२—आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ।
·· **चक्रीवद्रुमण्वच्चर्मण्वती** (उद्योत) ।

८।२।१८—कृपो रो लः ।
कृपे रो लः[1] (क्षीरत० १।५०८, तत्त्व०, प्रौढ०)
क्लृपो[2] रो लः (ना० पर्या० भा०पाठः) ।

८।२।३२—दादेर्धातोर्घः ।
दादेर्घः[3] (क्षीरत० १।७१८) ।

---

१. अयं न्यासः कातन्त्रे (३।८।६७) अपि दृश्यते ।

२. अस्मिन् पाठे 'रः' प्रथमैकवचनम्, 'लः' षष्ठ्येकवचनं ज्ञेयम् ।

३. अयं न्यासः कातन्त्रे (३।८।५७) अपि दृश्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

८।२।४४—ल्वादिभ्यः।
ल्वादिभ्यश्च (क्षीरत० ६।१२)।

८।२।५१—शुषः कः।
शुषेः कः (क्षीरत० ४।७४)।

८।२।७२—वसुस्रंसुध्वंस्वनडुहां दः।
......नडुहो दः (क्षीरत० १ ५०१)।

८।२।७९—न भकुर्छुराम्।
न [1]भकुरुछुराम् (क्षीरत० ६।७७)।

८।३।२७—नपरे नः।
नपरे न (न्यासः)।

८।३।६६—सदिरप्रतेः।
सदेरप्रतेः (क्षीरत० १।५६४)।

८।३।६८—अवाच्चाऽलम्बनाविदूर्ययोः।
अवादौर्जित्यालम्बनाविदूर्येषु[2] (क्षीरत० १।२७२)।

८।३।९२—प्रष्ठोऽग्रगामिनि।
प्रष्ठोऽग्रगामिणि (न्यास ४।१।४८ संपादकीया टि० बंगालसंस्करणे)।

८।३।९७—अम्बाम्बगोभूमिसव्याप ।
......सव्येऽप...(सि०कौ० मोती० बना० संस्क०)।

८।३।११८—सदेः परस्य लिटि।
सदिष्वञ्जोः परस्य लिटि (का०)।

८।४।५—प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्य—....।
......कार्श्यं... (तत्त्व०)।

---

१. कुधातौ क्षीरतरङ्गिण्यां (८।११) 'न भकुर्छुराम्' इत्येव पाठो दृश्यते।
२. अयं पाठश्चान्द्रे (६।४।५३) अपि दृश्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

८।४।२३—वमोर्वा ।

वमोर्वा (क्षीरत० २।२) ।

८।४।२७—उपसर्गादनोत्परः ।

उपसर्गाद् बहुलम् (का०, अन्यत्र भी) ।

८।४।३२—वा निंसनिक्षनिन्दाम् ।

वा निक्षंनिसनिन्दाम् (क्षीरत० १।४३६) ।

वा निंश · (धातुवृ० मैसूर सं० भाग ३, पृ० ६४) ।

॥ इत्यष्टाध्यायी-सूत्रपाठान्तर-संकलनं समाप्तम् ॥

महादेवसिंह संग्रामसिंहजी आनं
"लीलासदन" ४. आनंदधाम.
नगरी होस्पिटल के पास,
अहमदाबाद-३८० ००६.

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चम परिशिष्ट

मूल पाणिनीय शिक्षा

हम इस ग्रन्थ के प्रथम भाग के पृष्ठ २३६–२३७ पर लिख चुके हैं कि पाणिनि ने एक '**सूत्रात्मिका शिक्षा**' का प्रवचन किया था। यहां उसी के विषय में संक्षेप से वर्णन करके उसका मूलपाठ प्रकाशित करते हैं।

पाणिनीय शिक्षा के सम्प्रति दो प्रकार के पाठ मिलते हैं—एक सूत्रात्मक, और दूसरा श्लोकात्मक। सूत्रात्मक और श्लोकात्मक पाठ के भी लघु और वृद्ध दो-दो प्रकार के पाठ हैं।

आधुनिक पाणिनीय वैयाकरणों में पाणिनीय शिक्षा का श्लोकात्मक पाठ ही प्रसिद्ध है, और वैदिक भी वेदाङ्ग अन्तर्गत श्लोकात्मक पाणिनीय शिक्षा का ही पाठ करते हैं। श्लोकात्मक पाणिनीय शिक्षा के लघुपाठ में ३५ श्लोक, और वृद्धपाठ में ६० श्लोक हैं। लघुपाठ याजुष पाठ कहाता है, और वृद्धपाठ ऋक्पाठ।

सूत्रात्मक शिक्षा के भी लघु और वृद्ध दो पाठ हैं। श्री स्वामी दयानन्द सरस्वती ने वि० सं० १९३६ के मध्य में प्रयाग से पाणिनीय शिक्षा-सूत्रों का जो हस्तलेख प्राप्त किया था, वह पाठ लघुपाठ है। स्वामी दयानन्द सरस्वती को प्राप्त शिक्षासूत्र का हस्तलेख अन्त में त्रुटित था। अतः उसमें अष्टम प्रकरण का प्रथम सूत्र भी अपूर्ण ही है। मध्य में भी कहीं-कहीं पर लेखकप्रमाद से कुछ सूत्र छूटे हुए प्रतीत होते हैं। पाणिनीय शिक्षासूत्रों का जो पूर्ण पाठ हम छाप रहे हैं, वह वृद्धपाठ है। यह बात दोनों पाठों की तुलना से स्पष्ट हो जाती है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूल-पाठ—पाणिनीय शिक्षा के श्लोकात्मक और सूत्रात्मक जो दो प्रकार के पाठ मिलते हैं, उनमें पाणिनि-प्रोक्त मूलपाठ कौनसा है, इसका अति संक्षिप्त विवेचन किया जाता है—

श्लोकात्मिका पाणिनीय शिक्षा का प्रथम श्लोक है—

'अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।'

इस वचन से स्पष्ट है कि श्लोकात्मिका शिक्षा मूलतः पाणिनि-प्रोक्त नहीं है। वह तो किसी अन्य व्यक्ति द्वारा पाणिनीय मत के अनुसार बनाई गई है। श्लोकात्मिका पाणिनीय शिक्षा के प्रकाश-नाम्नी टीका के रचयिता के मत में इसका प्रवक्ता पाणिनि का अनुज आचार्य पिङ्गल है।[1] इस प्रकार ग्रन्थ के अन्तःसाक्ष्य और टीकाकार के साक्ष्य से सर्वथा स्पष्ट है कि श्लोकात्मिका पाणिनीय शिक्षा चाहे, उसका लघु याजुष पाठ हो, चाहे वृद्ध आर्च पाठ, दोनों ही मूलतः पाणिनि-प्रोक्त नहीं हैं। श्लोकात्मिका पाणिनीय शिक्षा का पाणिनि-प्रोक्त मूल ग्रन्थ इनसे भिन्न है। हमारा मत है कि पाणिनीय श्लोका-त्मिका शिक्षा का आधार पाणिनीय सूत्रात्मिका शिक्षा है।[2]

श्लोकात्मिका पाणिनीय शिक्षा के पठन-पाठन में अधिक प्रयुक्त होने के कारण सूत्रात्मक पाठ लुप्त हो गया, हस्तलेख भी अप्राप्य हो गए। श्लोकात्मिका शिक्षा मूलतः पाणिनि-प्रोक्त नहीं है, इस तथ्य की ओर सबसे पूर्व इस युग में श्री स्वामी दयानन्द सरस्वती का ध्यान गया। उन्होंने मूलभूत पाणिनीय शिक्षा की प्राप्ति के लिए महान्

---

१. ज्येष्ठभ्रातृभिर्विहितो व्याकरणेऽनुजस्तत्र भवान् पिङ्गलाचार्यः तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजानीते—अथ शिक्षामिति ।

२. आपिशल शिक्षा का भी एक श्लोकात्मक पाठ है। उसका आरम्भ का वचन है—अथ शिक्षां प्रवक्ष्यामि मतमापिशलेर्मुनेः ।

इस श्लोकात्मिका शिक्षा के १९ सूत्र उपलब्ध हुए थे। इन्हें भी डा० रघुवीर जी ने आपिशल शिक्षासूत्रों के पश्चात् छापा था।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रयत्न किया। अन्ततः वि० सं० १९३६ के मध्य में प्रयाग के एक ब्राह्मण के गृह से पाणिनीय शिक्षा-सूत्र का एक हस्तलेख प्राप्त किया। यद्यपि वह हस्तलेख भी अधूरा था, अन्त के एक या दो पत्र नष्ट हो चुके थे, पुनरपि स्वामी दयानन्द की यह उपलब्धि शिक्षाशास्त्र के क्षेत्र में बहुत महत्त्वपूर्ण थी। उन्होंने उपलब्ध शिक्षासूत्रों को आर्यभाषा व्याख्या सहित वि०सं० १९३६ के अन्त में **वर्णोच्चारणशिक्षा** के नाम से प्रकाशित किया।[1]

श्री स्वामी दयानन्द सरस्वती को प्राप्त हुए शिक्षासूत्रों का दूसरा हस्तलेख चिरकाल तक विद्वानों को उपलब्ध नहीं हुआ। इस कारण श्री स्वामी दयानन्द सरस्वती द्वारा प्रकाशित शिक्षासूत्रों के पाणिनीयत्व में विद्वानों को शङ्का बनी ही रही। दैवयोग से श्री डा० रघुवीरजी को अडियार (मद्रास) के पुस्तकालय से आपिशल शिक्षासूत्रों के दो हस्तलेख उपलब्ध हो गए। उन्होंने उनके साथ स्वामी दयानन्द सरस्वती द्वारा प्रकाशित शिक्षासूत्रों की तुलना करके स्वामी दयानन्द सरस्वती द्वारा प्रकाशित शिक्षासूत्रों के पाणिनीयत्व की स्थापना की। इस विषय में उन्होंने कुछ लेख भी लिखे।

इसके पश्चात् सन् १९३८ में कलकत्ता विश्वविद्यालय से मनोमोहन घोष एम० ए० सम्पादित **'पाणिनीय शिक्षा'** नामक एक ग्रन्थ प्रकाशित हुआ। इसकी बृहद् भूमिका में मनोमोहन घोष ने सारा प्रयत्न इस बात की सिद्धि के लिए लगाया कि पाणिनीय शिक्षा का श्लोकात्मक पाठ ही पाणिनि द्वारा प्रोक्त है, स्वामी दयानन्द सरस्वती द्वारा प्रकाशित सूत्रपाठ पाणिनीय नहीं है। इस प्रसंग में आपने डा० रघुवीर के लेख की आलोचना के साथ-साथ सूत्रात्मक पाठ को दयानन्द द्वारा कल्पित पाठ सिद्ध करने की भरपूर चेष्टा की।

मनोमोहन घोष के उक्त भूमिकास्थ लेख की विस्तृत आलोचना

---

१. इस विषय में जो अधिक जानना चाहें, वे हमारे 'ऋषि दयानन्द के ग्रन्थों का इतिहास' ग्रन्थ में देखें।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हमने **मूल पाणिनीय शिक्षा** इस शीर्षक से पटना की 'साहित्य' नाम्नी पत्रिका के सन् १९५९ अङ्क १ में प्रकाशित की। उसमें मनोमोहन घोष के सभी हेत्वाभासों का सप्रमाण निराकरण किया, और श्लोकात्मिका शिक्षा को पाणिनीय मानने पर अष्टाध्यायी से जो विरोध आते हैं, उनका उल्लेख करके सूत्रात्मक पाठ का पाणिनीयत्व सिद्ध किया। जो पाठक इस विषय में विशेष रुचि रखते हैं, वे हमारा उक्त लेख अवश्य पढ़ें।

आपिशल[1] और पाणिनीय शिक्षा

पाणिनीय शिक्षा के सूत्र आपिशल शिक्षा के सूत्रों के साथ बहुत साम्य रखते हैं। अतः आपिशल शिक्षासूत्रों की उपलब्धि पर यह विचार करना अत्यन्त आवश्यक हो गया कि स्वामी दयानन्द सरस्वती द्वारा प्रकाशित शिक्षासूत्र पाणिनीय हैं, अथवा आपिशल। दोनों के सूत्रपाठों की तुलना से इतना तो स्पष्ट है कि दोनों का पाठ प्रायः समान है। परन्तु जहां परस्पर में वैषम्य है, वह प्रवक्तृ-भेद के कारण है, अथवा पाठान्तरमूलक है। यद्यपि कुछ वैषम्य पाठान्तरमूलक कहे जा सकते हैं, पुनरपि कुछ पाठ ऐसे अवश्य हैं, जो प्रवक्तृभेद के कारण ही हैं। यथा—

आपिशल पाठ	पाणिनीय पाठ
ईषद्विवृतकरणा ऊष्माणः।	ईषद्विवृतकरणा ऊष्माणः।
	विवृतकरणा वा।
विवृतकरणाः स्वराः।	विवृतकरणाः स्वराः।

पाणिनीय पाठ में ऊष्म वर्णों का पक्षान्तर में विवृतकरण प्रयत्न कहा है, वह आपिशल पाठ में नहीं है। पाणिनीय अष्टाध्यायी में एक सूत्र है—**नाज्झलौ** (१।१।१०)। इस सूत्र द्वारा पूर्व **तुल्यास्यप्रयत्नं**

१. आपिशल शिक्षा के लिए देखिए हमारे द्वारा सम्पादित 'शिक्षा-सूत्राणि' संग्रह। इसमें चान्द्रशिक्षा का पाठ भी छापा है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सवर्णम् (१।१।६) सूत्र से प्राप्त अचों और हलों की (अ इ ऋ लृ की क्रमशः ह् श ष स के साथ) सवर्ण संज्ञा का निषेध किया है। उक्त हलों और अचों की सवर्ण संज्ञा तभी हो सकती है, यदि स्वरों और ऊष्मों के आभ्यन्तर प्रयत्न समान हों। दोनों के आभ्यन्तर प्रयत्न की समानता **विवृतकरणा वा** इस पाणिनीय सूत्र से ही सिद्ध है। आपिशल शिक्षा में उक्त सूत्र न होने से अज्झलों की सवर्ण संज्ञा ही प्राप्त नहीं होती।

इसके अतिरिक्त दोनों शिक्षासूत्रों के निम्न पाठ भी द्रष्टव्य हैं—

आपिशल पाठ	**पाणिनीय पाठ**
ञमङणनाः स्वस्थाना नासिकास्थानाः(१।१६)।	**ङञणनमाः स्वस्थान-नासिकास्थानाः**(१।२१)।
स्पर्शयमवर्णकारो ····· (५।१)।	**स्पर्शवर्णकरो** ··—।
अन्तस्थवर्णकारो ····· (५।२)।	**अन्तस्थवर्णकरो**······।
ऊष्मस्वरवर्णकारो ··· (५।३)।	**ऊष्मस्वरवर्णकरो**······।

इनमें से प्रथम उद्धरण में 'ञमङणनाः' निर्देश उणादि ञमन्ताड्डः (१।११४) सूत्र में प्रयुक्त ञम् प्रत्याहार के अनुरूप ञमङणनम् प्रत्याहारसूत्रानुसारी है। हमने अपने 'संस्कृत व्याकरण के इतिहास' में सप्रमाण दर्शाया है कि पञ्चपादी उणादि आपिशलि-प्रोक्त है, और उसमें प्रयुक्त 'ञम्' प्रत्याहार की दृष्टि से प्रत्याहारसूत्र में निर्दिष्ट **ञमङणन** क्रम आपिशलि द्वारा उपज्ञात है, और यही क्रम उसके शिक्षासूत्र में भी है। पाणिनीय सूत्र में वर्गक्रम से पाठ है।

अगले उद्धरणों में **कार** और **कर** का भेद है।[1] पाणिनीय **कर** पाठ पाणिनि के **कृञो हेतुताच्छील्यानुलोम्येषु** (३।२।२०) सूत्र के अनुसार है। **कार** पाठ में औत्सर्गिक **अण्** की कल्पना करनी पड़ती है।

---

१. पाणिनि के शिक्षासूत्र के वृद्ध पाठ में 'कार' पाठ मिलता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन भेदों के अतिरिक्त पाणिनीय शिक्षा में आपिशल शिक्षा की अपेक्षा निम्न सूत्र अधिक हैं -

कण्ठ्यान् आस्यमात्रान् इत्येके ।१।७।।
दन्तमूलस्तु तवर्गः।१।११।।
विवृतकरणा वा ।३।८।।

तीन सूत्रों का आधिक्य श्री स्वामी दयानन्द सरस्वती द्वारा प्रकाशित लघुपाठ से दर्शाया है। हम पूर्व कह चुके हैं कि उक्त हस्त-लेख में मध्य-मध्य में लेखकप्रमाद से कुछ सूत्र नष्ट हुए हैं। इनके अतिरिक्त सप्तम प्रकरण में चार सूत्र ऐसे हैं, जो आपिशलीय शिक्षा में नहीं हैं (हमारे द्वारा प्रकाशित वृद्ध पाठ में भी नहीं हैं)। वृद्धपाठ में तो उक्त तीन सूत्रों के अतिरिक्त ७-८ सूत्र और ऐसे हैं, जो आपि-शल शिक्षा में नहीं हैं।

इस संक्षिप्त विवेचना से स्पष्ट है कि स्वामी दयानन्द द्वारा प्रकाशित शिक्षासूत्र पाणिनीय ही हैं।

अब हम एक ऐसा प्रमाण भी उपस्थित करते हैं, जिससे स्पष्ट हो जाएगा कि ये सूत्र प्राचीन ग्रन्थकारों द्वारा पाणिनि के नाम से स्मृत भी हैं। तैत्तिरीय प्रातिशाख्य की **'त्रिरत्न-भाष्य'** नामक व्याख्या का रचयिता **सोमयार्य** लिखता है—

'सन्ध्यक्षराणां ह्रस्वा न सन्ति इति पाणिनीयेऽपि' । मैसूर संस्क०, पृष्ठ ४५० ।

इस प्रमाण की उपस्थिति में पाणिनीय शिक्षा-सूत्रों के सम्बन्ध में कोई विवाद उठ ही नहीं सकता। अब हम उसके वृद्धपाठ के विषय में लिखते हैं—

पाणिनीय शिक्षासूत्र का वृद्धपाठ—पाणिनीय शिक्षासूत्रों का जो वृद्धपाठ हम इस संस्करण में प्रकाशित कर रहे हैं, उसकी उपलब्धि की कथा भी विचित्र है। वह इस प्रकार है—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन् १९३९ में 'दि इण्डियन रिसर्च इन्स्टीट्यूट' कलकत्ता से 'आपिशली शिक्षा' नाम से एक शिक्षा प्रकाशित हुई। पुस्तक के मुख पृष्ठ पर 'अध्यापक अमूल्यचरण विद्याभूषण कर्तृक सम्पादित और अनूदित' शब्द छपे हुए हैं। इसमें बंगला अनुवाद तो अवश्य है, परन्तु सम्पादन के नाम पर किया जानेवाला कोई भी प्रयत्न इसमें नहीं है। हां, तीन स्थानों पर कोष्ठक में प्रश्नचिह्न (?) अवश्य उपलब्ध होते हैं। अस्तु, हमारे लिए तो यह प्रयत्नाभाव भी वरदान-रूप सिद्ध हुआ। उक्त ग्रन्थ को देखने से विदित होता है कि मुद्रित ग्रन्थ उपलब्ध हस्तलेख की अक्षरशः प्रतिलिपिमात्र है, और वह लेखकप्रमाद से वहुत भ्रष्ट हो गया है। पाठ स्थान-स्थान पर खण्डित और आगे-पीछे हो रहा है।

हमारी दृष्टि में यह ग्रन्थ सन् १९५३ में आया था। इस पर **'आपिशली शिक्षा'** नाम छपा होने से चिरकाल तक हमने इस पर ध्यान नहीं दिया। एक दिन विचार उत्पन्न हुआ कि इसको आपिशल शिक्षा-सूत्र से मिलाया जाय। तब हमने सन् १९४९ में स्वयं मुद्रापित आपिशल शिक्षासूत्रों से मिलान करना आरम्भ किया। उस तुलना में **ङञणनमा नासिकास्थानाः** पाठ ने हमारा ध्यान विशेषरूप से आकृष्ट किया, क्योंकि यह वर्णानुक्रम पाणिनीय शिक्षा-सूत्र में है। आपिशल शिक्षा में **ञमङणनाः** पाठ है। इसके पश्चात् तृतीय प्रकरण के **विवृतकरणा वा** सूत्र ने यह बोध कराया कि सम्भव है यह शिक्षा पाणिनीय ही हो, आपिशल शिक्षा न हो। इस दृष्टि से सम्पूर्ण सूत्रों की तुलना स्वामी दयानन्द सरस्वती द्वारा प्रकाशित शिक्षासूत्रों के साथ की, तब यह निश्चय हो गया कि जहां-जहां भी अमूल्यचरण विद्याभूषण द्वारा प्रकाशित शिक्षा का पाठ आपिशल शिक्षा से भिन्न है, वहां-वहां वह सर्वत्र स्वामी दयानन्द सरस्वती द्वारा प्रकाशित शिक्षासूत्रों से मिलता है। इस तुलना से इतना निश्चय हो गया कि यह पाठ पाणिनीय शिक्षा का ही है, आपिशल शिक्षा का नहीं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इस पर विचार उत्पन्न हुआ कि श्री अमूल्यचरणजी ने इस ग्रन्थ के ऊपर **आपिशली शिक्षा** शीर्षक किस आधार पर छापा ? इसके लिए हमने उनकी भूमिका पढ़ी। उसमें उन्होंने इस हस्तलेख के सम्बन्ध में कहीं पर भी नहीं लिखा कि कोश के आदि वा अन्त में 'आपिशली शिक्षा' नाम का उल्लेख है। प्रतीत होता है कि श्री अमूल्यचरणजी ने अष्टम प्रकरण के—

स एवमापिशलेः पञ्चदशभेदाख्या वर्णधर्मा भवन्ति ॥८॥

सूत्र में आपिशलि नाम देखकर ग्रन्थ के आद्यन्त में 'आपिशली शिक्षा' का नाम जोड़ दिया।

अमूल्यचरणजी द्वारा प्रकाशित पाठ अत्यन्त भ्रष्ट है। केवल उसी के आधार पर उस ग्रन्थ का सम्पादन कठिन है। सम्भवतः इसी कारण अमूल्यचरणजी ने हस्तलेख के अनुरूप ही उसे यथातथरूप में छाप दिया। इससे यह भी प्रतीत होता है कि उन्हें डा० रघुवीरजी द्वारा प्रकाशित 'आपिशलशिक्षा,' और स्वामी दयानन्द सरस्वती द्वारा प्रकाशित 'पाणिनीयशिक्षा' का ज्ञान नहीं था, अन्यथा वे उनकी सहायता से ग्रन्थ का अच्छा सम्पादन कर सकते थे।

हमने उक्त दोनों शिक्षासूत्रों के आधार पर, तथा विविध ग्रन्थों में उद्धृत सूत्रों के साहाय्य से इस अमूल्य निधि का सम्पादन किया है। जब हमने इस ग्रन्थ के पाठ का सम्पादन कर लिया, तब इस पाठ और स्वामी दयानन्द सरस्वती द्वारा प्रकाशित पाठ की तुलना से विदित हुआ कि हमारे द्वारा सम्पादित शिक्षा-पाठ वृद्धपाठ है, और स्वामी दयानन्द सरस्वती द्वारा प्रकाशित पाठ लघुपाठ है। अनेक प्राचीन ग्रन्थों के वृद्ध और लघुपाठ उपलब्ध होते हैं। पाणिनि के सूत्रपाठ धातुपाठ गणपाठ उणादिपाठ सभी के लघु पाठ और वृद्ध पाठ हैं।[1] इसी प्रकार उनकी सूत्रात्मिका शिक्षा के भी वृद्ध और लघु

---

१. इन पाठों के विषय में हमारे 'संस्कृत व्याकरण शास्त्र का इतिहास' के तत्तत् प्रकरण देखिए।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाठ हों, तो आश्चर्य ही क्या है। प्राचीन परम्परा के अनुसार वृद्ध और लघु दोनों प्रकार के पाठ एक ही आचार्य द्वारा विभिन्न प्रकार से प्रवचन[1] के कारण उत्पन्न हुए हैं।

अब हम पाणिनीय शिक्षा के दोनों पाठों की कुछ तुलना उपस्थित करते हैं—

लघु-पाठ	वृद्ध-पाठ
[वर्णास्] त्रिषष्टिः	स्थानकरणप्रयत्नेभ्यो वर्णास्त्रिषष्टिः ।४। चतुःषष्टिरित्येके । ५ । [इति] संयुक्ता वर्णाः ।१।२४।।
आभ्यन्तरस्तावत्	स्वस्थान आभ्यन्तरस्तावत् ।३।४।। तेभ्य ए ओ विवृततरौ ।३।९।। ताभ्यामै औ । ३।१० ।। ताभ्यामाकारः । ३।११।। कादयो मावसानाः स्पर्शाः । ४।८।। यादयोऽन्तस्थाः । ४।९ ।।
अवर्णो ह्रस्वदीर्घप्लुतत्वाच्च त्रैस्वर्योपनयेन चानुनासिक्यभेदाच्च संख्यातोऽष्टादशात्मकः ।	एवं व्याख्याने वृत्तिकाराः पठन्ति—अष्टादश-प्रभेदमवर्णकुलमिति । तत्कथमुक्तम्— ह्रस्वदीर्घप्लुतत्वाच्च त्रैस्वर्योपनयेन च । आनुनासिक्यभेदाच्च संख्यातोऽष्टादशात्मकः । ६।१२ ।। उत्साहः प्रयत्नः । ७।६ ।। स्पृष्टतादिर्वर्णगुणः । ७।७ ।।

---

१. प्राचीन आचार्य शास्त्रीय ग्रन्थ लिखा नहीं करते थे, अपितु पढ़ाया करते थे, अतः वे प्रोक्त कहाते थे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन उद्धरणों के विपरीत लघुपाठ में कुछ ऐसे पाठ भी हैं, जो वृद्धपाठ में लघुरूप में हैं, अथवा नहीं हैं। यथा—

लघुपाठ	वृद्धपाठ
द्वे द्वे वर्णे सन्ध्यक्षराणामारम्भके भवत इति।	द्विवर्णानि सन्ध्यक्षराणि।

सप्तम प्रकरण के निम्न २-५ सूत्र वृद्धपाठ में नहीं हैं—

तत्रैते कौशिकीयाः श्लोकाः—

सर्वान्तेऽयोगवाहत्वाद् विसर्गादिरिहाष्टकः।
अकार उच्चारणार्थो व्यञ्जनेष्वनुवध्यते॥
⌣क⌣ पयोः कपकारौ च तद्वर्गीयाश्रयत्वतः।
पलक्क्नी चख्खनतुर्जग्गिमर्जग्घ्नुरित्यत्र यद् वपुः॥
नासिक्येनोक्तं कादीनां त इमेऽयमाः।
तपामुकारः संस्थानवर्गीयलक्षकः॥

लघु पाठ में सर्वत्र आवश्यक नहीं कि उस पाठ में वृद्धपाठ की अपेक्षा लघुत्व ही हो। समूहावलम्बन से लघुत्व और वृद्धत्व देखा जाता है। लघुपाठ के सप्तम प्रकरण के जो सूत्र उद्धृत किए हैं, उन के विषय में यह भी सम्भावना हो सकती है कि लघुपाठ के किसी हस्तलेख में ये श्लोक किसी पाठक ने ग्रन्थान्तर से ग्रन्थ के प्रान्त (हाशिये) पर लिखे हों, और उत्तरकाल के प्रतिलिपिकर्त्ता ने उन्हें छूटा हुआ पाठ मानकर मूल में सन्निविष्ट कर दिया हो।

यतः जब तक लघुपाठ का अन्य हस्तलेख उपलब्ध न हो जाए, कुछ समस्याएं बनी ही रहेंगी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अथ पाणिनीयशिक्षा

वृद्ध-पाठः

१. आकाशवायुप्रभवः शरीरात्
समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो
वर्णत्वमागच्छति यः स शब्दः॥

२. तमक्षरं ब्रह्म परं पवित्रं
गुहाशयं सम्यगुशन्ति विप्राः।
स श्रेयसा चाभ्युदयेन चैव
सम्यक् प्रयुक्तः पुरुषं युनक्ति॥

३. स्थानमिदं करणमिदं
प्रयत्न एष द्विधाऽनिलः।
स्थानं पीडयति, वृत्तिकारः
प्रक्रम एषोऽथ नाभिततलात्॥

४. स्थानकरणप्रयत्नपरेभ्यो
वर्णास्त्रिषष्टिः।[1]

५. चतुःषष्टिरित्येके।

६. तत्र वर्णानां केषां किं स्थानं
किं करणं प्रयत्नश्च ते, द्विधा
विजभते (?)।

लघु-पाठः

१. आकाशवायुप्रभवः शरीरात्
समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो
वर्णत्वमागच्छति यः स शब्दः।

२. तमक्षरं ब्रह्म परं पवित्र
गुहाशयं सम्यगुशन्ति विप्राः।
स श्रेयसा चाभ्युदयेन चैव
सम्यक् प्रयुक्तः पुरुषं युनक्ति॥

३. [वर्णास्] त्रिषष्टिः।

४. स्थानमिदं करणमिदं
प्रयत्न एष द्विधाऽनिलः।
स्थानं पीडयति, वृत्तिकारः
प्रक्रम एषोऽथ नाभितलात्॥

१—स्थान-प्रकरणम्

१. तत्र स्थानं तावत्।

---

१. तुलना कार्या—त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते स्थिताः (मताः) इत्यर्वाचीनायां पाणिनीयशिक्षानाम्ना प्रसिद्धायां शिक्षायाम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्ध-पाठः	लघु-पाठः
२. अकुहविसर्जनीयाः कण्ठ्याः।[1]	१. अकुहविसर्जनीयाः कण्ठ्याः।
३. हविसर्जनीयावुरस्यावेकेषाम्।	२. हविसर्जनीयावुरस्यावेकेषाम्।
४. जिह्वामूलीयो जिह्व्यः।	३. जिह्वामूलीयो जिह्व्यः।
५. कवर्गावर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम्।	४. कवर्ग ऋवर्णश्च जिह्व्यः।
६. सर्वमुखस्थानमवर्णमित्येके।[2]	५. सर्वमुखस्थानमवर्णमित्येके।
७. कण्ठ्यानास्यमात्रानित्येके।	६. कण्ठ्यानास्यमात्रानित्येके।
८. इचुयशास्तालव्याः।[3]	७. इचुयशास्तालव्याः।
९. ऋटुरषा मूर्धन्याः।[4]	८. ऋटुरषा मूर्धन्याः।
१०. रेफो दन्तमूलीय एकेषाम्।	९. रेफो दन्तमूलीय एकेषाम्।
११. दन्तमूलस्तु तवर्गः।	१०. दन्तमूलस्तु तवर्गः।
१२. लृतुलसा दन्त्याः।[5]	११. लृतुलसा दन्त्याः।
१३. वकारो दन्त्योष्ठ्यः।	१२. वकारो दन्त्योष्ठ्यः।
१४. सृक्किणीस्थानमेकेषाम्।	१३. सृक्किणीस्थानमेकेषाम्।
१५. उपूपध्मानीया ओष्ठ्याः।[6]	१४. उपूपध्मानीया ओष्ठ्याः।

---

१. उद्धृतं न्यासे (प्रत्या० सूत्र ५, पृष्ठ २२; १।१।९, पृष्ठ ५८), पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च।

२. तुलना कार्या—सर्वमुखस्थानमवर्णमेके इच्छन्ति। महाभाष्य १।१।९॥

३. उद्धृत न्यासे (प्रत्या० सूत्र ५, पृष्ठ २२; १।१।९, पृष्ठ ५८); पदमञ्जर्यां (१।१।९ पृष्ठ ५८); न्यायमञ्जर्यां (पृष्ठ २०५) च।

४. उद्धृतं न्यासे (प्रत्या० सू० ५ पृष्ठ २०, २२; १।१।९, पृष्ठ ५८) पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च।

५. उद्धृतं न्यासे (प्रत्या० ५, पृष्ठ २२; १।१।९, पृष्ठ ५८); पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च।

६. उद्धृतं न्यासे (प्रत्या० ५, पृष्ठ २२; १।१।९, पृष्ठ ५८); पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

वृद्धपाठः	लघुपाठः
१६. अनुस्वारयमा नासिक्याः ।[1]	१५. अनुस्वारयमा नासिक्याः ।
१७. कण्ठ्यनासिक्यमनुस्वारमेके ।	१६. कण्ठ्यनासिक्यमनुस्वारमेके ।
१८. यमाश्च नासिक्यजिह्वामूलीया एकेषाम् ।	१७. यमाश्च नासिक्यजिह्वामूलीया एकेषाम् ।
१९. ए ऐ कण्ठतालव्यौ ।[2]	१८. एदैतौ कण्ठ्यतालव्यौ ।
२०. ओ औ कण्ठोष्ठ्यौ ।[3]	१९. ओदौतौ कण्ठ्योष्ठ्यौ ।
२१. ङञणनमाः स्वस्थाननासिकास्थानाः ।	२०. ङञणनमाः स्वस्थाननासिकास्थानाः ।
२२. द्विवर्णानि सन्ध्यक्षराणि ।	२१. द्वे द्वे वर्णे सन्ध्यक्षराणामारम्भके भवत इति ।
२३. सरेफ ऋवर्णः ।[4]	२२. सरेफ ऋवर्णः ।
२४. [इति] संयुक्ताः वर्णाः ।	
२५. एवमेतानि स्थानानि ।	

२—करण-प्रकरणम्

वृद्धपाठः	लघुपाठः
१. करणमपि ।	
२. जिह्व्यतालव्यमूर्धन्यदन्त्यानां जिह्वा करणम् ।	१. जिह्व्यतालव्यमूर्धन्यदन्त्यानां जिह्वा करणम् ।

---

१. उद्धृतं न्यासे (प्रत्या० ५, पृष्ठ २५; १।१।९, पृष्ठ ५९) ।

२. उद्धृतं न्यासे (१।१।९, पृष्ठ ५८; १।१।४८, पृष्ठ ९२); पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च ।

३. उद्धृतं न्यासे (प्रत्या० ५, पृष्ठ २०; १।१।९, पृष्ठ ५८; १।१।४८, पृष्ठ ९२); पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च ।

४. द्र०—येषां दर्शनमर्धमात्रा कालो रेफ ऋकारेऽस्तीति तन्मतेन······। येषामपि दर्शनं मात्राचतुर्थभागो रेफ ऋकार इति ···· । महाभाष्यप्रदीपे ८।४।१ कैयटः । अत्रापिशलशिक्षायामस्मिन् सूत्रे निर्दिष्टा टिप्पण्यपि द्रष्टव्या ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः	लघुपाठः
३. जिह्वामूलेन जिह्व्यानाम् ।	२. जिह्वामूलेन जिह्व्यानाम् ।
४. जिह्वामध्येन तालव्यानाम् ।	३. जिह्वामध्येन तालव्यानाम् ।
५. जिह्वोपाग्रेण मूर्धन्यानाम् ।	४. जिह्वोपाग्रेण मूर्धन्यानाम् ।
६. जिह्वाग्राधः करणं वा ।	५. जिह्वाग्राधः करणं वा ।
७. जिह्वाग्रेण दन्त्यानाम् ।	६. जिह्वाग्रेण दन्त्यानाम् ।
८. शेषाः स्वस्थानकरणाः ।	
९. इत्येतत् करणम् ।	७. इत्येतदन्तःकरणम् ।

३—अन्तःप्रयत्न-प्रकरणम्

१. प्रयत्नोऽपि द्विविधः ।	१. प्रयत्नोऽपि द्विविधः ।
२. आभ्यन्तरो बाह्यश्च ।	२. आभ्यन्तरो बाह्यश्च ।
३. स्वस्थाने आभ्यन्तरस्तावत् ।	३. आभ्यन्तरस्तावत् ।
४. स्पृष्टकरणाः स्पर्शाः ।[1]	४. स्पृष्टकरणाः स्पर्शाः ।
५. ईषत्स्पृष्टकरणा अन्तस्थाः ।[2]	५. ईषत्स्पृष्टकरणा अन्तस्थाः ।
६. ईषद्विवृतकरणा ऊष्माणः ।	६. ईषद्विवृतकरणा ऊष्माणः ।
७. विवृतकरणा वा ।	७. विवृतकरणा वा ।
८. विवृतकरणाः स्वराः ।[3]	८. विवृतकरणाः स्वराः ।
९. तेभ्य ए ओ विवृततरौ ।[4]	
१०. ताभ्यामै औ ।[5]	

---

१. उद्धृतं न्यासे(१।१।९, पृष्ठ ५९); पदमञ्जर्यां(१।१।९, पृष्ठ ५७)च ।

२. उद्धृत न्यासे(१।१।९, पृष्ठ ५९)पदमञ्जर्यां; (१।१।९, पृष्ठ ५७)च ।

३. उद्धृतं न्यासे(प्रत्या० सूत्र १, पृष्ठ ८); पदमञ्जर्यां (प्रत्या० १, पृष्ठ १८) च ।

४. उद्धृतं न्यासे(प्रत्या० १, पृष्ठ ८)पदमञ्जर्यां(प्रत्या० १, पृष्ठ १८)च ।

५. उद्धृतं पदमञ्जर्याम् (प्रत्या० १, पृष्ठ १८); न्यासे तु 'ताभ्यामपि ऐ औ' इत्येवं पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः	लघुपाठः
११. ताभ्यामकारः ।[1]	
१२. संवृतस्त्वकारः ।[2]	९. संवृतस्त्वकारः ।
१३. इत्येषोऽन्तःप्रयत्नः ।	१०. इत्येषोऽन्तःप्रयत्नः ।

४—बाह्यप्रयत्न-प्रकरणम्

१. अथ बाह्याः प्रयत्नाः ।	१. अथ बाह्याः प्रयत्नाः ।
२. वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः ।[3]	२. वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदानाश्चाघोषाः ।
३. वर्गयमानां प्रथमा अल्पप्राणा इतरे सर्वे महाप्राणाः ।[4]	३. एके अल्पप्राणा इतरे महाप्राणाः ।
४. वर्गाणां तृतीयचतुर्था अन्तस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ नासिक्याश्च संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च ।[5]	४. वर्गाणां तृतीयचतुर्था अन्तस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ नासिक्याश्च संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च ।

---

१. 'ताभ्यामप्याकारः' इत्येवं न्यासे (प्रत्या० १; पृष्ठ ८); पदमञ्जर्यां (प्रत्या० १, पृष्ठ १८) च पाठः ।

२. 'संवृतोऽकारः, इत्येवं न्यासे (प्रत्या० १, पृष्ठ ८); पदमञ्जर्यां (प्रत्या० १, पृष्ठ १८) च पाठः ।

३. उद्धृतं न्यासे (१।१।९, पृष्ठ ५७; १।१।५०, पृष्ठ ८५); पदमञ्जर्यां (१।१।९, पृष्ठ ५७) च ।

४. 'वर्गयमानां प्रथमे प्रथमेऽल्पप्राणा इतरे महाप्राणाः' इत्येवं पदमञ्जर्यां (१।१।९, पृष्ठ ५७); न्यासे (वर्ग्यंयमानां' पाठा० १।१।९, पृष्ठ ५७) च पठ्यते ।

५. उद्धृतं न्यासे (प्रत्या० ५, पृष्ठ २५, १।१।९, पृष्ठ ५७; १।१।५०,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः	लघुपाठः
५. वर्गयमानां तृतीया अन्तस्थाश्चाल्पप्राणा इतरे सर्वे महाप्राणाः ।[1]	५. [एकेऽन्तस्थाश्चाल्पप्राणा इतरे सर्वे महाप्राणाः] ।
६. यथा तृतीयास्तथा पञ्चमाः ।[2]	६. यथा तृतीयास्तथा पञ्चमाः ।
७. आनुनासिक्यमेषामधिको गुणः ।[3]	७. आनुनासिक्यमेषामधिको गुणः ।
८. कादयो मावसानाः स्पर्शाः ।[4]	
९. यादयोऽन्तस्थाः ।[5]	
१०. शादय उष्माणः ।[6]	८. शादय उष्माणः ।
११. सस्थानेन द्वितीयाः ।[7]	९. [स]स्थानेन द्वितीयाः ।

पृष्ठ ८५) पदमञ्जर्यां (१।१।९, पृष्ठ ५७) च । पदमञ्जर्यां न्यासे (१।१।९, पृष्ठ ५७); उद्धरणे 'नासिक्याश्च' पदं नास्ति) ।

१. उद्धृतं न्यासे (१।१।९, पृष्ठ ५७; १।१।५०, पृष्ठ ९५—पूर्वोद्धरणे 'वर्ग्य' पाठः); पदमञ्जर्यां (१।९, पृष्ठ ५८—'सर्वे' पदं नास्ति) च ।

२. उद्धृतं न्यासे(प्रत्या० ५, पृष्ठ २५; १।१।९, पृष्ठ ५७), पदमञ्जर्यां (१।१।९, पृष्ठ ५८) च ।

३. उद्धृतं न्यासे (१।१।९ पृष्ठ ५७); पदकञ्जर्यां (१।१।९, पृष्ठ ५८)च ।

४. उद्धृतं न्यासे(१।१।९, पृष्ठ ५७); पदञ्जर्यां (१।१।९, पृष्ठ ५७) च ।

५. न्यासे (१।१।९, पृष्ठ ५७); पदमञ्जर्यां (१।१।९, पृष्ठ ५७) च 'यरलवा अन्तस्थाः' इत्येवं पठ्यते, सोऽर्थतोऽनुवादो द्रष्टव्यः ।

६. उद्धृतं न्यासे (१।१।५० पृष्ठ ९६); पदमञ्जर्यां(१।१।५०, पृष्ठ ९७) च । यतु न्यासे (१।१।९, पृष्ठ ५७); पदमञ्जर्यां (१।१।९, पृष्ठ ५७) च 'शषसहा उष्माणः' इत्येवं पाठ उपलभ्यते, सोऽर्थतोऽनुवादो द्रष्टव्यः ।

७. उद्धृतं न्यासे (१।१।५०, पृष्ठ ९६, ९७); पदमञ्जर्यां (१।१।५० पृष्ठ ९७) च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः	लघुपाठः
१२. हकारेण चतुर्थाः ।[1]	१०. हकारेण चतुर्थाः ।
१३. इत्येष बाह्यः प्रयत्नः ।	

५—स्थानपीडन-प्रकरणम्

१. तत्र स्पर्शयमवर्णकरो वायुरयःपिण्डवत् स्थानमभिपीडयति ।	१. तत्र स्पर्शयमवर्णकरो वायुरयःपिण्डवत् स्थानमभिपीडयति ।
२. अन्तस्थवर्णकरो वायुर्दारुपिण्डवत् ।	२. अन्तस्थवर्णकरो वायुर्दारुपिण्डवत् ।
३. ऊष्मस्वरवर्णकारो वायुरूर्णापिण्डवत् ।	३. ऊष्मस्वरवर्णकारो वायुरूर्णापिण्डवत् ।
	४. उक्ताः स्थानकरणप्रयत्नाः ।

६—वृत्तिकार-प्रकरणम्

१. एवं व्याख्याने वृत्तिकाराः पठन्ति--अष्टादशप्रभेदमवनकुलमिति । तत्कथमुक्तम् ?	
२. ह्रस्वदीर्घप्लुतत्वाच्च त्रैस्वर्योपनयेन च । आनुनासिक्यभेदाच्च संख्यातोऽष्टादशात्मकः ।।इति।	१. अवर्णो ह्रस्वदीर्घप्लुतत्वाच्च त्रैस्वर्योपनयेन चानुनासिक्यभेदाच्च संख्यातोऽष्टादशात्मकः ।
३. एवमिवर्णादयः ।	२. एवमिवर्णादयः ।
४. लृवर्णस्य दीर्घा न सन्ति ।[2]	३. लृवर्णस्य दीर्घा न सन्ति ।

---

१. उद्धृतं न्यासे(१।१।५०, पृष्ठ ९६, ९७); पदमञ्जर्यां (१।१।५०, पृष्ठ ९७) च।

२. उद्धृतं काशिकायाम्(१।१।९) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः

५. तं द्वादशप्रभेदमाचक्षते ।[1]

६. यदृच्छाशब्देऽशक्तिजानुकरणे वा यदा दीर्घाः स्युस्तदाऽष्टादशप्रभेदं ब्रुवते क्लृपक इति ।

७. सन्ध्यक्षराणां ह्रस्वा न सन्ति ।[2]

८. तान्यपि द्वादशप्रभेदानि ।[3]

९. छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं [च] पठन्ति ।[4]

१०. तेषामष्टादश प्रभेदानि ।

११. अन्तस्था द्विप्रभेदा रेफवर्जिताः सानुनासिका निरनुनासिकाश्च ।[5]

१२. रेफोष्मणां सवर्णा न सन्ति ।[6]

लघुपाठः

४. तं द्वादशभेदमाचक्षते ।

५. यदृच्छाशब्देऽशक्तिजानुकरणे वा यदा दीर्घाः स्युस्तदाऽष्टादशभेदं ब्रुवते क्लृपक इति ।

६. सन्ध्यक्षराणां ह्रस्वा न सन्ति ।

७. तान्यपि द्वादशप्रभेदानि ।

८. अन्तस्था द्विप्रभेदा रेफवर्जिताः सानुनासिका निरनुनासिकाश्च ।

९. रेफोष्मणां सवर्णा न सन्ति ।

---

१. उद्धृतं काशिकायाम्(१।१।९) ।

२. उद्धृतं काशिकायाम्(१।१।९) । 'पाणिनीयेऽपि' इत्येवं कृत्वोद्धृतः । तैत्तिरीयप्रतिशाख्यस्य त्रिरत्नभाष्ये (मैसूर सं० पृ० ४५०) ।

३. उद्धृतं काशिकायाम् (१।१।९) ।

४. तुलना कार्या—ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते इति । महाभाष्ये प्रत्या० ३; १।१।४७ सूत्रे च ।

५. स्वल्पपाठान्तरेणोद्धृतं काशिकायाम्(१।१।९); पदमञ्जर्यां(प्रत्या० ६, पृष्ठ ३३) च ।

६. उद्धृतं महाभाष्ये(प्रत्या० ५) ; काशिकायां (१।१।९); पदमञ्जर्यां (प्रत्या० ५); न्यासे(प्रत्या० ५) च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः	लघुपाठः
१३. वर्ग्यो वर्ग्येण सवर्णः ।[1]	१०. वर्ग्यो वर्ग्येण सवर्णः ।

७—प्रक्रम-प्रकरणम्

वृद्धपाठः	लघुपाठः
१. एष क्रमो वर्णानाम् ।	१. एष क्रमो वर्णानाम् ।
२. तत्रैषां स्थानकरणप्रयत्नानां कथं प्रसिद्धिरित्युच्यते ।	२. तत्रैते कौशिकीयाः श्लोकाः ।
	३. सर्वान्तेऽयोगवाहत्वाद् विसर्गादिरिहाष्टकः । अकार उच्चारणार्थो व्यञ्जनेष्वनुबध्यते ॥
	४. ≍क≍पयोः कपकारौ च तद्वर्गीयाश्रयत्वतः । पालिक्क्नी चख्ख्नतुर्जग्मिर्जघ्घ्नुरित्यत्र यद्वपुः ॥
	५. नासिक्येनोक्तं कादीनां त इमेऽयमाः । तेषामुकारः संस्थान वर्गीय लक्षकः ॥
	६. उक्ताः स्थानकरणप्रयत्नाः ।
३. इह यत्र स्थाने वर्णा उपलभ्यन्ते तत् स्थानम् ।	७. इह यत्र स्थाने वर्णा उपलभ्यन्ते तत् स्थानम् ।
४. येन निर्वृत्यन्ते तत् करणम् ।	८. येन निर्वृत्यन्ते तत् करणम् ।
५. प्रयतनं प्रयत्नः ।[2]	९. प्रयतनं प्रयत्नः ।

१. उद्धृतं महाभाष्यदीपिकायां(पृष्ठ १८४ हस्त०)काशिकायां(१।१।९)च
२. उद्धृतं महाभाष्ये (१।१।९) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

वृद्धपाठः **लघुपाठः**

६. उत्साह प्रयत्नः ।

७. स्पृष्टतादि वर्णगुणः ।

८—नाभितल-प्रकरणम्

१. [1]तत्र नाभिप्रदेशात् प्रयत्न-प्रेरितः प्राणो[2] नाभिवायु-रूर्ध्वमाक्रामन्नुरआदीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते । विधार्यमाणः सोऽपि तत्स्थानानि विहन्ति[3] । तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्यत आकाशे, सा वर्णश्रुतिः । स वर्णस्यात्मलाभः ।

१. तत्र नाभिप्रदेशात् प्रयत्न-प्रेरितः प्राणो नाम वायु-रूर्ध्वमाक्रामन्नुरआदीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते । [इति ऽग्रे ग्रन्थपातः]

[इति पाणिनीयशिक्षा-सूत्राणां लघुपाठः ।।]

२. तत्र वर्णानामुत्पद्यमाने[4] यदा स्थानकरणप्रयत्नपर्यन्तं परस्परं स्पृशति[5] सा स्पृष्टता ।

३. यदेषत् स्पृशति[6] सा ईषत्स्पृष्टता ।

---

१. न्यासे (१।१।९, पृष्ठ ५६, ५७) अस्य प्रकरणस्य १-२३ सूत्राण्युद्धृतानि ।

२. प्राणो नाम ऊर्ध्वमाक्रमन्नुरःप्रभृतीनामन्यतमस्मिन् —न्यासे । द्रष्टव्यमत्रास्यैव प्रकरणस्याष्टमे चतुर्दशे च सूत्रे नाभिपदम् । लघुपाठे तु 'प्राणो नाम' इत्येव पठ्यते ।

३. स विधार्यमाणः स्थानमभिहन्ति । ततः—न्यासे ।

४. वर्णध्वनावुत्पद्यमाने—न्यासे ।

५. ० प्रयत्नाः परस्परं स्पृशन्ति - न्यासे ।

६. ईषद् यदा स्पृशन्ति —न्यासे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः

४. यदा दूरेण स्पृशति[१] सा विवृता[२] ॥

५. यदा सामीप्येन स्पृशति[३] सा संवृता ।[४]

६. एषोऽन्तः प्रयत्नः ।[५]

७. अथ बाह्यः प्रयत्नः ।[५]

८. स एवेदानीं प्राणो नाभिवायुरू[६]र्ध्वमाक्रम्य मूर्ध्नि प्रतिहते[७] निवृत्तः तदा कोष्ठे संहन्यमाने[८] गलबिलस्य संवृतत्वात् संवारो नाम वर्णधर्मो जायते[९], विवृतत्वाद् विवारः ।

९. तौ संवारविवारौ ।[१०]

१०. तत्र यदा कण्ठबिलं संवृतत्वं तदा नादो जायते ।[११]

११. विवृते तु कण्ठबिले श्वासोऽनुजायते ।[१२]

१२. तौ श्वासनादावनुप्रदानावित्याचक्षते ।[१३]

१३. अन्ये श्वासनादानुप्रदानं व्यञ्जने नादवत् ।[१४]

---

१. दूरेण यदा स्पृशन्ति—न्यासे । न्यासे तु चतुर्थपञ्चमसूत्रयोः पौर्वापर्यं विद्यते । २. द्रष्टव्यमत्रास्यैव प्रकरणम् २६ षड्विंशं सूत्रम् ।

३. सामीप्येन यदा स्पृशन्ति—न्यासे ।

४. द्रष्टव्यमत्रास्यैव प्रकरणम् २६ षड्विंशं सूत्रम् ।

५. नास्ति सूत्रम्— न्यासे ।

६. स एव प्राणो नाम वायुरूर्ध्वमाक्रापन्—न्यासे ।

७ प्रतिहतो०—न्यासे ।

८. निवृत्तो यदा कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्यमाने—न्यासे ।

९. वर्णधर्मं उपजायते—न्यासे । १०. नास्ति सूत्रं - न्यासे ।

११. संवृते गलबिलेऽव्यक्तः शब्दो नादः—न्यासे । न्यासेऽर्थतोऽनुवादः स्यात् ।

१२. विवृते श्वासः—न्यासे । न्यासेऽर्थतोऽनुवादः स्यात् ।

१३. तौ श्वासनादानुप्रदानाविति केचिदाचक्षते—न्यासे ।

१४. अन्ये तु ब्रुवते—अनुप्रदानमनुस्वानो घण्टानिर्ह्रादवत्—न्यासे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः

१४. तत्र यदा नाभिस्थलजध्वनौ[1] नादोऽनुप्रदीयते, तदा नादध्वनि-संसर्गाद्[2] घोषो जायते।

१५. यदा श्वासोऽनुप्रदीयते तदा श्वास[ध्वनि]संसर्गाद्[3] अघोषो जायते।[4]

१६. सा घोषवदघोषता।[5]

१७. महति वायौ महाप्राणः।

१८. अल्पे वायावल्पप्राणः।

१९. साल्पप्राणमहाप्राणता।[6]

२०. [यत्र]महाप्राणत्वम् ऊष्माणस्ते।[7]

२१. तत्र[8] यदानुसारिप्रयत्नस्तीव्रो भवति, तदा गात्राणां[9] निग्रहः, कण्ठविलस्य चाल्पत्व[10] स्वरस्य च वायोस्तीव्रगतित्वाद् रौक्ष्यं भवति तमुदात्तमाचक्षते।

२२. यदा मन्दः प्रयत्नो भवति, तदा गात्राणां[11] प्रसन्नत्वं कण्ठबिलस्य च बहुत्वं[12] स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति। तमनुदात्तमाचक्षते।

२३. उदात्तानुदात्त[13]सन्निकर्षात् स्वरित इति।

२४. स एवं प्रयत्नोऽभिनिवृत्तः कृत्स्नः प्रयत्नो भवति।

२५. स एवमापिशलेः पञ्चदशभेदाख्या वर्णधर्मा भवन्ति।

---

१. यदा स्थानाभिघातजे ध्वनौ—न्यासे।
२. ० ध्वनिसंगाद्—न्यासे।
३. ० ध्वनिसंगाद्—न्यासे।
४. जायते—नास्ति न्यासे।
५. सूत्रं नास्ति—न्यासे।
६. सूत्रं नास्ति—न्यासे।
७. सूत्रं नास्ति—न्यासे।
८. तत्र—नास्ति। यदा सर्वाङ्गानुसारी—न्यासे।
९. गात्रस्य—न्यासे।
१०. कण्ठविवरस्य चाणुत्वं—न्यासे।
११. गात्रस्य स्रंसवं—न्यासे।
१२. महत्त्वं—न्यासे।
१३. उदात्तानुदात्तस्वरसन्निकर्षात्—न्यासे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धपाठः

२६. तद्यथा—स्पृष्टता ईषत्स्पृष्टता विवृता संविवृता च ।
संवारविवारौ श्वासनादौ घोषवदघोषता ।
अल्पप्राणमहाप्राणता उदात्तानुदात्तस्वरिता इति ।

२७. इदानीं शिक्षाग्रन्थः श्लोकैरुपसंह्रियते—

२८. अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥

२९. स्पृष्टत्वमीषत्स्पृष्टत्वं संवृतत्वं तथैव च ।
विवृतत्वं च वर्णानामन्तःकरणमुच्यते ॥

३०. कालो विवारसंवारौ श्वासनादावघोषता ।
घोषोऽल्पप्राणता चैव महाप्राणः स्वरास्त्रयः ॥

३१. बाह्यं करणमाहुस्तान् वर्णानां वर्णवेदिनः ॥

—: इति पाणिनीयशिक्षासूत्राणां वृद्धपाठः समाप्तः :—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षष्ठ परिशिष्ट

अष्टाध्यायीसूत्राणां सूची

अ अ ८।४।६७
अंशं हारी ५।२।६९
अकः सवर्णे दीर्घः ६।१।९७
अकथितं च १।४।५१
अकर्तरि च कारके० ३।३।१९
अकर्तर्य्रृणे पञ्चमी २।३।२४
अकर्मकाच्च १।३।२६
अकर्मकाच्च १।३।३५
अकर्मकाच्च १।३।४५
अकर्मधारये राज्यम् ६।२।१२९
अकृच्छ्रे प्रियसुख० ८।१।१३
अकृत्सार्वधातुकयो० ७।४।२५
अके जीविकार्थे ६।२।७३
अकेनोर्भविष्यदाधम० २।३।७०
अक्षशलाकासंख्याः० २।१।१०
अक्षेषु ग्लहः ३।३।७०
अक्षोऽन्यतरस्याम् ३।१।७५
अक्ष्णोऽदर्शनात् ५।४।७६
अगारान्ताट्ठन् ४।४।७०
अगारैकदेशे प्रघणः० ३।३।७९
अग्नीत्प्रेषणे परस्य च ८।२।९२
अग्नेः स्तुत्स्तोमसोमाः ८।३।८२
अग्नेर्ढक् ४।२।३२
अग्नौ चेः ३।२।९१
अग्नौ परिचाय्यो० ३।१।१३१
अग्राख्यायामुरसः ५।४।९३
अग्राद्यत् ४।४।११६
अग्रान्तशुद्धशुभ्रवृष० ५।४।१४५
अङितश्च ६।४।१०३
अङ्ग इत्यादौ च ६।१।११५
अङ्गयुक्तं तिङाकाङ्क्षम् ८।२।९६
अङ्गस्य ६।४।१
अङ्गानि मैरेये ६।२।७०
अङ्गाऽप्रातिलोम्ये ८।१।३३
अङ्गुलेर्दारुणि ५।४।११४
अङ्गुल्यादिभ्यष्ठक् ५।३।१०८
अ च ४।३।३१
अच उपसर्गात्तः ७।४।४७
अचः ६।४।१३८
अचः कर्तृयकि ६।१।१९५
अचः कर्मकर्तरि ३।१।६२
अचः परस्मिन् पूर्ववि० १।१।५६
अचतुरविचतुरसुच० ५।४।७७
अचश्च १।२।२८

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain, Digitization by eGangotri

अचस्तास्वत्थल्य० ७।२।६१
अचित्तहस्तिधेनो० ४।२।४६
अचित्താददेशका० ४।३।९६
अचि र ऋतः ७।२।१००
अचि विभाषा ८।२।२१
अचि श्नुधातुभ्रुवां० ६।४।७७
अचो ञ्णिति ७।२।११५
अचोऽन्त्यादि टि १।१।६३
अचो यत् ३।१।९७
अचो रहाभ्यां द्वे ८।४।४५
अच्कावशक्तौ ६।२।१५६
अच्च घेः ७।३।११९
अच्छगत्यर्थवदेषु १।४।६८
अच्प्रत्यन्ववपूर्वा० ५।४।७५
अजर्यं संगतम् ३।१।१०५
अजादी गुणवचना० ५।३।५८
अजादेर्द्वितीयस्य ६।१।२
अजाद्यतष्टाप् ४।१।४
अजाद्यदन्तम् २।२।३३
अजाविभ्यां थ्यन् ५।१।८
अजिनान्तस्योत्तरप० ५।३।८२
अजिव्रज्योश्च ७।३।६०
अजेर्व्यघञपोः २।४।५६
अज्झनगमां सनि ६।४।१६
अज्ञाते ५।३।७३
अञ्चेः पूजायाम् ७।२।५३
अञ्चेर्लुक् ५।३।३०
अञ्चेश्छन्दस्यसर्व०. ६।१।१६४
अञ्त्रोऽनपादाने ८।२।४८
अञ्जेः सिचि ७।२।७१
अञ्नासिकायाः सं० ५।४।११८
अट्कुप्वाङ्नुम्व्यवाये० ८।४।२
अड् गार्ग्यगालवयोः ७।३।९९
अणञौ च ४।३।३३
अणावकर्मकाच्चित्त० १।३।८८
अणि नियुक्ते ६।२।७५
अणो द्व्यचः ४।१।१५६
अणोऽप्रगृह्यस्यानुना० ८।४।५६
अण्कर्मणि च ३।३।१२
अण्कुटिलिकायाः ४।४।१८
अण्च ५।२।१०३
अणिञोरनार्षयोर्गु रू० ४।१।७८
अणिनुणः ५।४।१५
अणुदित्सवर्णस्य चा० १।१।६८
अणृगयनादिभ्यः ४।३।७३
अण्महिष्यादिभ्यः ४।४।४८
अत आदेः ७।४।७०
अत इञ् ४।१।९५
अत इनिठनौ ५।२।११५
अत उत्सार्वधातुके ६।४।११०
अत उपधायाः ७।२।११६
अत एकहल्मध्ये० ६।४।१२०
अतः कृकमिकंसकुंभ० ८।३।४६
अतश्च ४।१।१७५
अति ग्रहाव्यथनक्ष० ५।४।४६
अतिथेर्न्यः ५।४।२६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिरतिक्रमणे च १।४।९४
अतिशायने तमबिष्ठनौ ५।३।५५
अतेः शुनः ५।४।९६
अतेरकृत्पदे ६।२।१९०
अतो गुणे ६।१।९४
अतो दीर्घो यञि ७।३।१०१
अतो भिस ऐस् ७।१।९
अतोऽम् ७।१।२४
अतो येयः ७।२।८०
अतो रोरप्लुतादप्लुते ६।१।१०९
अतो लोपः ६।४।४८
अतो ल्रान्तस्य ७।२।२
अतो हलादेर्लघोः ७।२।७
अतो हेः ६।४।१०५
अत्यन्तसंयोगे च २।१।२८
अत्र लोपोऽभ्यासस्य ७।४।५८
अत्रानुनासिकः पूर्वस्य० ८।३।२
अत्रिभृगुकुत्सवसिष्ठ० २।४।६५
अत्वसन्तस्य चाधातोः ६।४।१४
अत्स्मृदृत्वरप्रथम्रद० ७।४।९५
अदः सर्वेषाम् ७।३।१००
अदभ्यस्तात् ७।१।४
अदर्शनं लोपः १।१।५९
अदस औ सुलोपश्च ७।२।१०७
अदसो मात् १।१।१२
अदसोऽसेर्दादु दो मः ८।२।८०
अदिप्रभृतिभ्यः शपः २।४।७२
अदूरभवश्च ४।२।६९
अदेङ् गुणः १।१।२
अदो जग्धिर्ल्यप्ति किति २।४।३६
अदोऽनन्ने ३।२।६८
अदोऽनुपदेशे १।४।६९
अद्ड्डतरादिभ्यः पञ्च० ७।१।२५
अद्भिः संस्कृतम् ४।४।१३४
अद्यश्वीनावष्टब्धे ५।२।१३
अधः शिरसी पदे ८।३।४७
अधिकम् ५।२।७३
अधिकरणवाचिनश्च २।३।६८
अधिकरणवाचिना च २।२।१३
अधिकरणविचाले च ५।३।४३
अधिकरणे बन्धः ३।४।४१
अधिकरणे शेतेः ३।२।१५
अधिकरणैतावत्त्वे च २।४।१५
अधिकृत्य कृते ग्रन्थे ४।३।८७
अधिपरी अनर्थकौ १।४।९२
अधिरीश्वरे १।४।९६
अधिशीङ्स्थासां कर्म १।४।४६
अधिगर्थदयेशां कर्मणि २।३।५२
अधीष्टे च ३।३।१६६
अधुना ५।३।१७
अधेः प्रसहने १।३।३३
अधेरुपरिस्थम् ६।२।१८७
अध्ययनतो विप्रकृष्टा० २।४।५
अध्यर्धपूर्वाद् द्विगोर्लु० ५।१।२८
अध्यायन्यायोद्याव० ३।३।१२२
अध्यायानुवाकयोर्लुक् ५।२।६०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अध्यायिन्यदेशका० ४।४।७१
अध्यायेष्वेवर्षेः ४।३।६९
अध्वनो यत्खौ ५।२।१६
अध्वर्युकषाययोर्जातौ ६।२।१०
अध्वर्युक्रतुरनपुंसकम् २।४।४
अन् ६।४।१६७
अन उपधालोपिनो० ४।१।२८
अनङ् सौ ७।१।९३
अनचि च ८।४।४६
अनत्यन्तगतौ क्तात् ५।४।४
अनत्याधान उरसि० १।४।७४
अनद्यतने लङ् ३।२।१११
अनद्यतने लुट् ३।३।१५
अनद्यतने र्हिलन्यत० ५।३।२१
अनन्तावसथेतिह० ५।४।२३
अनन्त्यस्यापि प्रश्ना० ८।२।१०५
अनभिहिते २।३।१
अनवक्लृप्त्यमर्षयो० ३।३।१४५
अनश्च ५।४।१०८
अनसन्तान्नपुंसका० ५।४।१०३
अनाप्यकः ७।२।११२
अनिगन्तोऽञ्चतौ वं० ६।२।५२
अनितेरन्तः ८।४।१९
अनिदितां हल उप० ६।४।२४
अनुकम्पायाम् ५।३।७६
अनुकरणं चानितिप० १।४।६१
अनुकाभिकाभीकः० ५।२।७४
अनुगवमायामे ५।४।८३
अनुगादिनष्ठक् ८।४।१३
अनुग्वलंगामी ५।२।१५
अनुदात्तं सर्वमपादादौ ८।१।१८
अनुदात्तङित आत्म० १।३।१२
अनुदात्तं च ८।१।३
अनुदात्तं पदमेक० ६।१।१५२
अनुदात्तं प्रश्नान्ता० ८।२।१००
अनुदात्तस्य च य० ६।१।१५५
अनुदात्तस्य चर्दुपध० ६।१।५८
अनुदात्तादेरञ् ४।२।४३
अनुदात्तादेश्च ४।३।१३८
अनुदात्ते च ६।१।१८४
अनुदात्ते च कुधपरे ६।१।११६
अनुदात्तेतश्च हलादेः ३।२।१४९
अनुदात्तोपदेशवन० ६।४।३७
अनुदात्तौ सुप्पितौ ३।१।४
अनुनासिकस्य क्वि० ६।४।१५
अनुनासिकात्परोऽनु० ८।३।४
अनुपदसर्वान्नायानयं० ५।२।९
अनुपद्यन्वेष्टा ५।२।९०
अनुपराभ्यां कृञः १।३।७९
अनुपसर्गाज्ज्ञः १।३।७६
अनुपसर्गात्फुल्लक्षीब० ८।२।५५
अनुपसर्गाद्वा १।३।४३
अनुपसर्गाल्लिम्प० ३।१।१३८
अनुपसर्जनात् ४।१।१४
अनुप्रतिगृणश्च १।४।४१
अनुप्रवचनादिभ्य० ५।१।१११०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुब्राह्मणादिनिः ४।२।६१
अनुर्यत्समया २।४।१४
अनुर्लक्षणे १।४।८३
अनुवादे चरणानाम् २।४।३
अनुविपर्यभिनिभ्यः० ८।३।७२
अनुशतिकादीनां च ७।३।२०
अनुस्वारस्य ययि० ८।४।५७
अनृष्यानन्तर्ये वि० ४।१।१०४
अनेकमन्यपदार्थे २।२।२४
अनेकाल्शित्सर्वस्य १।१।५४
अनो नुट् ८।२।१६
अनो बहुव्रीहेः ४।१।१२
अनो भावकर्मवचनः ६।२।१४९
अनोरकर्मकात् १।३।४९
अनोरप्रधानकनी० ६।२।२८८
अनोश्मायःसरसां० ५।४।९४
अनौ कर्मणि ३।२।१००
अन्तः ६।२।९२
अन्तः ६।२।१४२
अन्तः ६।२।१७८
अन्तःपूर्वपदाट्ठञ् ४।३।६०
अन्तरं बहिर्योगोप० १।१।३५
अन्तरदेशे ८।४।२३
अन्तरपरिग्रहे १।४।६४
अन्तरान्तरेण युक्ते २।३।४
अन्तर्घनो देशे ३।३।७८
अन्तर्धौ येनादर्शन० १।४।२८
अन्तर्बहिर्भ्यां च० ५।४।११७
अन्तर्वत्पतिवतोर्नुक् ४।१।३२
अन्तश्च ६।२।१७९
अन्तश्च तवै युगपत् ६।१।१९४
अन्तात्यन्ताध्वदूर० ३।२।४८
अन्तादिवच्च ६।१।८२
अन्तिकबाढयोर्नेद० ५।३।६३
अन्तोदात्तादुत्तर० ६।१।१६३
अन्तोऽवत्याः ६।१।२१४
अन्त्यात्पूर्वं बह्वचः ६।२।८३
अन्नाण्णः ४।४।८५
अन्नेन व्यञ्जनम् २।१।३३
अन्यतो ङीष् ४।१।४०
अन्यथैवंकथमित्थंसु० ३।४।२७
अन्यपदार्थे च संज्ञा० २।१।२०
अन्यारादितरर्ते दि० २।३।२९
अन्येभ्योऽपि दृश्यते ३।२।१७८
अन्येभ्योऽपि दृश्यते ३।३।१३०
अन्येभ्योऽपि दृश्यन्ते ३।२।७५
अन्येषामपि दृश्यते ६।३।१३६
अन्येष्वपि दृश्यते ३।२।१०१
अन्वच्यानुलोम्ये ३।४।६४
अन्ववतप्ताद्रहसः ५।४।८१
अपगुरो णमुलि ६।१।५२
अपघनोऽङ्गम् ३।३।८१
अपचितश्च ७।२।३०
अपत्यं पौत्रप्रभृति० ४।१।१६२
अपथं नपुंसकम् २।४।३०
अपदातौ साल्वात् ४।२।१३४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अपदान्तस्य मूर्धन्यः ८।३।५५
अपपरी वर्जने १।४।८७
अपमित्ययाचिता० ४।४।२१
अपरस्पराः क्रिया० ६।१।१३९
अपरिमाणबिस्ताचि० ४।१।२२
अपरिह्वृताश्च ७।२।३२
अपरोक्षे च ३।२।११९
अपवर्गे तृतीया २।३।६
अपस्करो रथाङ्गम् ६।१।१४४
अपस्पृधेथामानृचुरा० ६।१।३५
अपह्नवे ज्ञः १।३।४४
अपाच्च ६।२।१८५
अपाच्चतुष्पाच्छकु० ६।१।१३७
अपादाने चाहीयरुहोः ५।४।४५
अपादाने पञ्चमी २।३।२८
अपादाने परीप्सायाम् ३।३।५२
अपाद्वदः १।३।७३
अपिः पदार्थसंभाव० १।४।९५
अपूर्वपदादन्यतर० ४।१।१४०
अपृक्त एकाल्प्रत्ययः १।२।४१
अपे क्लेशतमसोः ३।२।५०
अपे च लषः ३।२।१४४
अपेतापोढमुक्तप०त० २।१।३७
अपोनप्त्रपान्नप्तृभ्यां घः ४।२।२६
अपो भि ७।४।४८
अप्तृन्तृच्स्वसृनप्तृने० ६।४।११
अप्पूरणीप्रमाण्योः ५।४.११६
अ प्रत्ययात् ३ ३.१०२
अप्लुतवदुपस्थिते ६।१।१२५
अभाषितपुंस्काच्च ७।३।४८
अभिजनश्च ४।३।९०
अभिजिद्विदभृ० ५।३।११८
अभिज्ञावचने लृट् ३।२।११२
अभिनिविशश्च १।४।४७
अभिनिष्क्रामतिद्वा० ४।३।८६
अभिनिसः स्तनः ८।३।८६
अभिप्रत्यतिभ्यः क्षिपः १।३।८०
अभिरभागे १।४।९०
अभिविधौ भाव इनुण् ३।३।४४
अभिविधौ संपदा च ५।४।५३
अभेर्मुखम् ६।२।१८४
अभेश्चाविदूर्ये ७।२।२५
अभ्यमित्राच्छ च ५।२।१७
अभ्यस्तानामादिः ६।१।१८३
अभ्यासस्यासवर्णे ६।४।७८
अभ्यासाच्च ७।३।५५
अभ्यासे चर्च ८।४.५३
अभ्युत्सादयांप्रजन० ३।१।४२
अमनुष्यकर्तृके च ३।२।५३
अमहन्नवं नगरेऽनु० ६।२।८९
अमावस्यदन्यतर० ३।१।१२२
अमावास्याया वा ४।३।३०
अमि पूर्वः ६।१।१०३
अमु च च्छन्दसि ५।४।१२
अमूर्धमस्तकात्स्वा० ६।३।११
अमैवाव्ययेन २।२।२०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमो मश् ७।१।४०
अम्नरूधरवरित्युभय० ८।२।७०
अम्बाम्बगोभूमिस० ८।३।९७
अम्बार्थनद्योर्ह्रस्वः ७।३।१०७
अम् संबुद्धौ ७।१।९९
अयःशूलदण्डाजिना० ५।२।७६
अयङ् यि क्ङिति ७।४।२२
अयनं च ८।४।२४
अस्मयादीनि च्छ० १।४।२०
अयामन्ताल्वाय्येत्न्वि० ६।४।५५
अरण्यान्मनुष्ये ४।२।१२८
